**B.A. 3rd Semester (Programme) Examination, 2020-21**

**SANSKRIT**

**Course ID: 30919** **Course Code: ACP-303C-MIL-2**

**Course Title: MIL-2**

**Full Marks: 40** **Time: 2hrs**

1. **निम्नलिखितप्रश्नेषु पञ्चप्रश्नानाम् उत्तरं प्रदेयम्।** **2x5=10**

a) गङ्गदत्तः कः? स कुत्र वसति स्म?

b) मणिभद्रः कस्मिन् जनपदे कस्मिन् नगरे च प्रतिवसति स्म?

c) जम्बुपादपे कः प्रतिवसति स्म? तस्य नाम किम्?

d) करालमुखः कस्य नाम? स कुतः समागतः?

e) श्रेष्ठिनः नाम किम्? स कुत्र वसति स्म?

f) ब्राह्मणस्य पुत्राः कथं देशान्तरं गताः?

g) पञ्चतन्त्रस्य रचयिता कः? इदं कीदृशं काव्यम्?

h) कस्मिन् तन्त्रे 'वानरमकरकथा' अस्ति? किं तस्य तन्त्रस्य नाम?

**2. अधोनिर्दिष्टेषु चत्वारः प्रश्नाः समाधेयाः।** **5 x 4=20**

(a) **अधोलिखितेषु पञ्चानां सन्धिः कार्यः।** **5**

i. रामेण + अपि

ii. मनः + रथः

iii. लते + एते

iv. यदि + अपि

v. प्रातः + एव

vi. रवौ + उदिते

vii. सः + अधुना

**(b) अधोलिखितेषु पञ्चानां सन्धिविच्छेदः कार्यः।** **5**

i. मृन्मयः

ii. साधूक्तम्

iii. पित्रालयः

iv. अन्वेषणम्

v. मनोयोगः

vi. महानाग्रहः

vii. स्वागतम्

**(c) अधोलिखितेषु पञ्चानां विग्रहवाक्यं विलिख्य समासः निरूपणीयः।** **5**

i. प्रतिदिनम्

ii. कविश्रेष्ठः

iii. पीताम्बरः

iv. दुर्भिक्षम्

v. राजर्षिः

vi. व्याघ्रभयम्

vii. केशाकेशि

**(d) अधोलिखितेषु पञ्चानां समासबद्धरूपं लिखित्वा समासः निरूपणीयः।** **5**

i. जाया च पतिश्च

ii. कुम्भं करोति यः, सः

iii. नीलम् उत्पलम्

iv. शक्तिम् अनतिक्रम्य

v. त्रयाणां भुवनानां समाहारः

vi. राज्ञः पुरुषः

vii. रूपस्य योग्यम्

**(e)** अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।

सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः।। व्याख्यायताम्। **5**

**(f)** ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे।

निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः।। व्याख्यायताम्। **5**

**(g)** सर्वनाशे च सञ्जाते प्राणानामपि संशये।

अतिशत्रुं प्रणम्यापि रक्षेत् प्राणान् धनानि च।। व्याख्यायताम्। **5**

**3. अधोनिर्दिष्टेषु एकः प्रश्नः समाधेय:। 10x1=10**

**(a) अनुच्छेदं पठित्वा सर्वे प्रश्ना: समाधेया:। 10**

अस्ति कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः। स कदाचिद् दायादैरुद्वेजितोऽरघट्टघटीमारुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् कथं तेषां दायादानां मया प्रत्युपकार: कर्तव्यः। उक्तञ्च-

आपदि येनापकृतं येन च हसितं दशासु विषमासु।

अपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये।।

एवं चिन्तयन् विले प्रविशन्तं कृष्णसर्पमपश्यत्। तद् दृष्ट्वा भूयोऽप्यचिन्तयत् - यदेनं तत्र कूपे नीत्वा सकलदायादानामुच्छेदं करोमि। उक्तञ्च-

शत्रुभिर्यो जयेच्छत्रुं बलिना बलवत्तरम्।

स्वकार्याय यतो न स्यात् काचित् पीडात्र तत्क्षये।।

i) मण्डूकराज: कः? स कुत्र निवसति स्म? **2x5=10**

(ii) स दायादैरुद्वेजितः किं कृतवान् ?

(iii) केषां प्रत्युपकारः कर्तव्यः? एवं कः चिन्तितवान्?

(iv) चिन्तयन् गङ्गदत्तः कम् अपश्यत्? तद्दृष्ट्वा स किं चिन्तितवान् ?

(v) स्वकार्याय किं कर्तव्यम्?

**(b) अनुच्छेदं पठित्वा सर्वे प्रश्नाः समोधेयाः।** **10**

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बुपादपः सदाफलः। तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म। अथ कदाचित्तस्य तरोरधस्तात् करालमुखो नाम मकरः समुद्रसलिलान्निष्क्रम्य सुकोमलवालुकासनाथे तीरोपान्ते न्यविशत्। ततश्च रक्तमुखेन स प्रोक्तः - भोः भवान् समभ्यागतोऽतिथिः। तद् भक्षयतु मया दत्तान्यमृतकल्पानि जम्बुफलानि। उक्तञ्च-

प्रियो वा यदि वा द्वेष्यो मुर्खो वा यदि पण्डितः।

वैश्वदेवान्तमापन्नः सोऽतिथिः स्वर्गसंक्रमः।।

(i) समुद्रोपकण्ठे किम् आसीत्? **2x5=10**

(ii) मकरस्य नाम किम्? स कुत्र निवसति स्म?

iii) करालमुखः कुतः समागतः?

(iv) भोः भवान् समभ्यागतोऽतिथिः इति कः कमुक्तवान्?

(v) सोऽतिथिः, दत्तान्यमृतफलानि इत्यनयोः पदयोः सन्धिविच्छेदं करोतु।

**c) अनुच्छेदं पठित्वा सर्वे प्रश्नाः समाधेयाः।** **10**

अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम्। तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्म। तस्य च धमार्थकामकर्माणि कुर्वतो विधिवशाद् धनक्षयः सञ्जातः। ततः विभवक्षयादपमानपरम्परया परं विषादं गतः। ... अथान्यदा रात्रौ सुप्तश्चिन्तितवान्। अहो धिगियं दरिद्रताम्। उक्तञ्च-

शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म।

न विराजन्ति हि सर्वे वित्तविहीनस्य पुरुषस्य।।

मानो वा दर्पो वा विज्ञानं विभ्रमः सुबुद्धिर्वा।

सर्वं प्रणश्यति समं वित्तविहिनो यदा पुरुषः।।

(i) पाटलिपुत्रं नाम नगरं कुत्रास्ति? **2x5=10**

(ii) मणिभद्रः कः? तस्य किम् अभवत्?

(iii) श्रेष्ठी कथं विषादं गत:?

(iv) मानो दर्पो वा कदा विनश्यति?

(v) अहो धिगियं दरिद्रताम् – क एवं चिन्तितवान्?